श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये विंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये विंशं दशकम् ॥

## ऋषभयोगीश्वरचरितवर्णनम्

प्रियव्रतस्य प्रियपुत्रभूता -
दाग्नीध्रराजादुदितो हि नाभिः ।
त्वां दृष्टवानिष्टदमिष्टिमध्ये
तवैव तुष्ट्यै कृतयज्ञकर्मा ॥ 20.1 ॥

अभिष्टुतस्तत्र मुनीश्वरैस्त्वं
राज्ञः स्वतुल्यं सुतमर्थ्यमानः ।
स्वयं जनिष्येऽहमिति ब्रुवाण -
स्तिरोदधा बर्हिषि विश्वमूर्ते ॥ 20.2 ॥

नाभिप्रियायामथ मेरुदेव्यां
त्वमंशतोऽभूर्ऋषभाभिधानः ।
अलोकसामान्यगुणप्रभाव -
प्रभाविताशेषजनप्रमोदः ॥ 20.3 ॥

त्वयि त्रिलोकीभृति राज्यभारं
निधाय नाभिः सह मेरुदेव्या ।
तपोवनं प्राप्य भवन्निषेवी
गतः किलानन्दपदं पदं ते ॥ 20.4 ॥

इन्द्रस्त्वदुत्कर्षकृतादमर्षा -
द्ववर्ष नास्मिन्नजनाभवर्षे ।

यदा तदा त्वं निजयोगशक्त्या
स्ववर्षमेनद्व्यदधाः सुवर्षम् ॥ 20.5 ॥

जितेन्द्रदत्तां कमनीं जयन्ती -
मथोद्वहन्नात्मरताशयोऽपि।
अजीजनस्तत्र शतं तनूजा -
नेषां क्षितीशो भरतोऽग्रजन्मा ॥ 20.6 ॥

नवाभवन् योगिवरा नवान्ये
त्वपालयन् भारतवर्षखण्डान्।
सैका त्वशीतिस्तव शेषपुत्रा -
स्तपोबलात् भूसुरभूयमीयुः ॥ 20.7 ॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्रमध्ये
विरक्तिभक्त्यन्वितमुक्तिमार्गम्।
स्वयं गतः पारमहंस्यवृत्ति -
मधा जडोन्मत्तपिशाचचर्याम् ॥ 20.8 ॥

परात्मभूतोऽपि परोपदेशं
कुर्वन् भवान् सर्वनिरस्यमानः।
विकारहीनो विचचार कृत्स्नां
महीमहीनात्मरसाभिलीनः ॥ 20.9 ॥

शयुव्रतं गोमृगकाकचर्यां
चिरं चरन्नाप्य परं स्वरूपम्।
दवाहृताङ्गः कुटकाचले त्वं
तापान् ममापाकुरु वातनाथ ॥ 20.10 ॥

॥ इति श्रीमन्नारायणीये विंशं दशकं समाप्तम् ॥